National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(58): 237-238
© 2025 NJHSR
www.sanskritarticle.com

**डॉ. मुरलि: एस्**
सहायप्राध्यपक:, ज्योतिषविभाग:,
मद्रपुरी संस्कृतमहाविद्यालय:,
मयूरपुरी चेन्नै ४

**Correspondence:**
**डॉ. मुरलि: एस्**
सहायप्राध्यपक:, ज्योतिषविभाग:,
मद्रपुरी संस्कृतमहाविद्यालय:,
मयूरपुरी चेन्नै ४

# कालनिरूपणम्

**डॉ. मुरलि: एस्**

त्रिस्कन्धरूपेण विभागिते अस्मिन् ज्योतिषे महाशास्त्रे अयं गणितविषय: सप्रमाणं सुस्पष्टं च उपदिष्ट: वर्तते।

संस्कृतवाङ्मये गणितस्य मूलं ज्योतिषशास्त्रं भवति। ज्योतिषे विद्यमानस्य सिद्धान्तस्कन्धस्यैव अपरं नाम गणितमिति। तदुक्तं भास्कराचार्येण सिद्धन्तशिरोमणौ

सिद्धान्त: स उदाहृतोऽत्र गणितस्कन्धप्रबन्धो बुधै:। इति।

एवञ्च सिद्धान्तग्रन्थे कालाधारिता: विचारा: प्रधानतया विचरिता: वर्तन्ते। तदुक्तं भास्कराचार्येण

त्रुट्यादि प्रलयन्तकालकलना--- इति।

अत्रोक्त कालस्य एवं गणितस्य च क: संबन्ध: काले गणितं कथं भवति इति अस्मिन् कालनिरूपण विषये विचारयाम:। कलयति इति काल:। अर्थात् गणयति इत्यर्थ:। यथा व्याकरणे अक्षराणां प्रक्रियाप्रयोगादि दशाभेदा: सन्ति। तथा अत्रापि प्रक्रिया प्रक्रियाफलमिति वर्तते। गणितेन निष्पन्नं फलं एव काल:।प्रक्रियां विना कालस्य प्रतिपादनं कर्तुं न शक्यते।तदृश: अयं काल: द्वेधा विभज्यते। महाकाल: खण्डकाल: इति। महाकाल: नित्य: विभु: अनन्त: च भवति। व्यावहारिक: खण्डकाल: संवत्सरमासादय:। लोके यानि वस्तूनि कादिलान्तरूपेण व्यवह्रियन्ते तानि अतिशयोक्तानि असाधारणानि च भवन्ति।उदाहरणार्थं तु काली देवता सङ्कल्प:। कादिलान्तपदेन व्यवह्रियमाणा एषा महामाया सर्वाधारमयी एवं सर्वप्राणधात्री च भवति।सर्वेऽपि देवता: तां स्तुत्वा एव लोकरक्षणे प्रवर्तन्ते।किं बहुना - मनुष्या: अपि यदा स्वजीवनं पराधीनं वर्तते अथवा दुर्भाग्यशालिन: वा भवन्ति तदा कादिलान्तं कालमेव कारणं इति चिन्तयन्ति।एवं विभिन्न महत्वयुक्त कालोपदेशावसरे सुर्यसिद्धान्ते सूर्यांशपुरुष: वदति।

दद्यां कालाश्रयं ज्ञानं ग्रहाणां चरितं महत् इति।

एवमपि

लोकानामन्तकृत् काल: कालोऽन्य: कलनात्मक:।

सद्विधा स्थुलसूक्ष्मत्वात् मूर्तश्चामूर्त उच्यते।

अर्थात् सर्वलोकानां निर्णयकृत् काल: महाकाल: अमूर्त: एक एव:। कलनात्मक: अथवा गणनात्मककाल: मूर्त: काल: द्वितीय:। एतादृश: कलनात्मक: काल: द्वेधा भवति। तदुच्यते सूर्यसिद्धान्ते

प्रणादि: कथितो मुर्त: त्रुट्याद्य: अमूर्तसंज्ञक:।

षड्भि: : प्राणै: विनाडी स्यात् तत् षष्ट्या नाडिका स्मृता॥

प्राणादय: गणनार्हा: व्यवहर्तुं योग्या: मूर्ता: स्थूला: च भवन्ति। त्रुट्यादय: काला: गणनार्हेऽपि व्यवहर्तुं अनर्हा: अमूर्ता: च भवन्ति। तादृशकालास्तु

सूच्या पद्म पत्रभेदनकाल: त्रुटि: इति अभिधीयते।

६० त्रुट्य: १ रेणु: १/ ५००४ सेकन्ड्

| | | |
|---|---|---|
| ६० रेणव: १ लव: | | १ /८०० सेकड् |
| ६० लवा: १ लीक्षकम् | | १ /१५ सेकन्ड् |
| ६०लीक्षकानि १ प्राण: | | ४ सेकन्ड् |

मूर्ता: स्थूलकालास्तु

| | |
|---|---|
| ६ प्राण: १ विनाडिका | २४ सेकन्ड् |
| ६० विनाडिका १ नाडिका | २४ मिनिट् |
| सार्धद्विनाडिका | १ हवर् |

३० नाडिका १ अह: ३० नाडिका रात्रि: अहोरात्रम् एक: दिनम्

| | |
|---|---|
| ७ दिनानि | १ सप्ताह: |
| २ सप्ताह: ससन्धि: | १ पक्ष: |
| २ पक्ष: | एक: मास: |
| २ मास: | १ ऋतु: |
| ३ ऋतव: | १ अयनम् |

२ अयनम् १ मनुष्यसंवत्सर: एकं देवदिनम्

३६० मनुष्यसंवत्सरा: एक: देवसंवत्सर:

| | |
|---|---|
| ४८०० देववर्षाणि | कृतयुगम् |
| ३८०० देववर्षाणि | द्वापरयुगम् |
| २४०० देववर्षाणि | त्रेतायुगम् |
| १२०० देववर्षाणि | कलियुगम् |
| १२००० देववर्षाणि | १ महायुगम् |
| ७१ महायुगानि | १ मन्वन्तरम् |

१४ मनव: ९९४ महायुगानि ६ महायुगानि सन्धि:

१००० महायुगानि एक: ब्रह्मकल्प: एकं ब्राह्मं दिनम्

ब्रह्मण: परमायु: शतमिति सूर्यसिद्धान्ते।

अर्धांश: गत:। वयं ब्रह्मण: द्वितीये परार्धे अष्टाविंशतितमे कलौ युगे वैवस्वते मन्वन्तरे जीवाम: इति गणना वर्तते।

इदानीन्तन कालव्यवहारसंज्ञा हवर् इत्याख्यं आङ्गलपदं अतिप्रसिद्धं वर्तते।तदस्माकं संस्कृते विद्यमानहोरापदादेवागतमस्ति।

सार्धद्वयनाडिका एका होरा भवति। होरा नाम एक हवर्। अहोरत्रे एव एषा होरा अन्तर्भवति इत्यत: अहोरात्रशब्दात् होराशब्दस्य निष्पत्तिं कांक्षमाना: दैवविद: पूर्वापरवर्णलोपेन होराशब्दं निष्पादयन्ति।

तदुक्तं मिहिरेण -- होरेत्यहोरात्रविलपमेके वाञ्छन्ति इति।

त्रय: मासविशेषा लोकव्यवहारे प्रसिद्धा: सन्ति। ते सावनमास: सौरमास: चन्द्रमास: इति।

सावनमास:

उदयादुदयान्तं हि सावनं दिनमिष्यते।तद्वत् इनोदयद्वयान्तरं तदर्क सावनं दिनम् इति सावनदिननिर्वचनं दृश्यते।सुर्योदयात् सूर्योदयपर्यन्तं सावनं दिनं भवति।त्रिंशत् सावनदिनानि एक: सावनमास:।सावनमासस्य संज्ञा लोके न दृश्यते।

सौरमास:

षष्ट्यधिक त्रिंशत् भागात्मके भगणचक्रे सूर्यस्य एकभागाभोगकाल: एकं सौरं दिनं भवति। त्रिंशत् भागापूर्तिकाले एकराशिपूर्ति: भवति तदेव सौरमास:। सुर्यसंक्रान्तिद्वयान्तर्वर्तिकाल: सौरमास:।

सौरमासा: राशिनाम्नि प्रसिद्धा: मेषादय: द्वदशमासा:।

चान्द्रमासा:

सूर्याचन्द्रमसो: अन्तरं द्वादशभागात्मक: काल: तिथि:। एकं चन्द्रं दिनं भवति। तिथय: शुक्ले बहुले च पञ्चदशदिनानि। आहत्य ३० दिनानि। अमान्तद्वयान्तर्वर्तिकाल: एक: चान्द्रमास:। शुक्लप्रतिपदात् प्रारभ्यते।

चान्द्रमासा: अपि द्वादश। चैत्रवैशाखादय: प्रसिद्धा:।

इति कालनिरूपणसंप्रदायविवरणं प्रोक्तं भवति।